International Journal of Sanskrit Research 2020; 6(3): 113-115

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(3): 113-115
© 2020 IJSR
www.anantaajournal.com
Received: 26-03-2020
Accepted: 27-04-2020

डा. चक्रपाणिपोखेल:
अतिथि-अध्यापक: संस्कृत-विभाग:
ओडिशाकेन्द्रीयविश्वविद्यालय:
कोरापुटम, ओडिशा, भारत

**Corresponding Author:**
डा. चक्रपाणिपोखेल:
अतिथि-अध्यापक: संस्कृत-विभाग:
ओडिशाकेन्द्रीयविश्वविद्यालय:
कोरापुटम, ओडिशा, भारत

# करणकारकविचार:

डा. चक्रपाणिपोखेल:

प्रस्तावना

वैयाकरणै: तृतीयाविभक्तिरनुक्ते कर्तरि करणे च विधीयते। तत्र तृतीयाविभक्तिविधायकं सूत्रमस्ति "कर्तृकरणयोस्तृतीया" [1] एषा च तृतीयाविभक्ति: द्विविधा भवति कर्तृतृतीया करणतृतीया चेति। 'आश्रयोऽवधिरुद्देश्य:' इत्यादिना कर्तुराश्रयोऽर्थो ध्येय:। एवञ्च यथा उक्तकर्तु: आश्रयोऽर्थस्तथैव अनुक्तकर्तुरपि आश्रय एवार्थ:। तथा चोक्तं कौण्डभट्टेन यथा-
"द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थ:" इति। [2] इत्थञ्च कर्तरि विधीयमाना या तृतीया तस्या: कर्तृत्वमेवाऽर्थो युक्तो भवति। कर्तृत्वञ्च 'प्रधानधात्वर्थव्यापाराश्रयत्वम्'। एवञ्चात्र व्यापारस्य धातुलभ्यत्वाद् 'अनन्यलभ्यो हि शब्दार्थ:' इति रीत्या आश्रयत्वमेव कर्तृतृतीयार्थ इति फलति।
आश्रयत्वं तृतीयार्थ इति स्वीकारे प्रकृत्यर्थस्याभेदसम्बन्धेन आश्रयत्वस्य च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वय:। एवञ्च हरि: सेव्यते इत्यादौ आख्यातार्थोऽप्याश्रय: "फलव्यापारयो: धातुराश्रये तु तिङ: स्मृत:" [3] इत्युक्ते:। 'हरि: सेव्यते' इत्यत्र फले हरेरभेदेन, तिङर्थभूतस्याश्रयस्य फले वृतित्वसम्बन्धेन, फलस्य चानुकूलत्वसम्बन्धेन व्यापारेऽन्वय:। तथा च मदभिन्नाश्रयनिष्ठहर्यभिन्नाश्रयवृत्तिसेवनानुकूलो व्यापार इति प्राचां मते बोधो भवति। तथैव कर्मणि प्रत्यये फलमुख्यविशेष्यकशाब्दबोधस्वीकर्तृणां नव्यानां मते तु मदभिन्नाश्रयनिष्ठव्यापारजन्यहर्यभिन्नाश्रयवृत्ति: सेवेति शाब्दबोधो भवति। इत्थं कर्तृतृतीयाया आश्रयार्थे स्वीकृते करणतृतीयाया अर्थ: क:? इति शंका जागर्ति। तत्र करणतृतीयाया अर्थज्ञानार्थं प्रथमं करणस्य अर्थज्ञानमाश्यकं भवति। करणत्वस्य लक्षणं यथा नागेशेन "स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम्" [4] इति। इदमेव साधकतमत्वमिति पदेन नागेश: स्वमतस्य सूत्रकारेण सह संगतिं प्रदर्शयति। तत्र करणविषये सूत्रकारस्य मतं यथा "साधकतमं करणम्" [5] अस्य सूत्रस्य व्याख्यानं वैयाकरणैरेवं कृतं "क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्" इत्यस्या: वृत्तेरयं भाव:। "यद्यपि क्रियासिद्धौ सर्वेषां कारकाणां साधकत्वं किन्तु यस्यातिशयेनोपकारकत्वं विवक्षते तत् तदा करणम्।" अत्रातिशयेनोपकारकत्वञ्च यथा हर्युक्तम्-

क्रियाया:परिनिष्पत्ति:यद्व्यापारादनन्तरम्।
विवक्षते यदा यत्र करणं तत्तदा स्मृतम्।। [6] इति।।

यथा 'रामेण बाणेन हतो बाली' इत्यत्र बाण: क्रियाया: परिनिष्पत्तौ कर्तु: व्यापारादनन्तरमतिशयेनोपकारको भवति इति तस्य साधकतमत्वात् करणसंज्ञा भवति।अत्र हि रामं विना बालिनं विना अपि हननक्रियाया: सिद्धिर्न भविष्यति। अत उभयो: करणत्वं साधकत्वं वा हननक्रियासिद्धौ किन्तु बाणस्य बालिसंयोगानुकूलो यो व्यापार: तदनन्तरमेव हननक्रियाया: सिद्धिर्भवति। अतो बाणस्य प्रकृष्टोपकारकत्वात् करणसंज्ञा भवति न तु रामस्य। एवञ्च यद्व्यापारादनन्तरं तत्करणमिति सिद्ध्यति। यद्व्यापारादनन्तरं क्रियासिद्धि: तत्पदार्थमेव करणमिति पाणिनिमतं न तु द्रव्यमात्रं करणमिति। अत एव पाणिनिनोक्तम् "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य" इति। [7]

अस्य सूत्रस्यार्थस्तु यथा "अद्रव्यवाचकेभ्य एतेभ्य: शब्देभ्य: करणे तृतीयापञ्चम्यौ भवत:।" इति एवञ्च द्रव्यातिरिक्तानामपि करणत्वं स्वीकृतं पाणिनिना। करणस्य स्वरुपविषये भर्तृहरिणा स्वस्य वाक्यपदीयग्रन्थे इत्थं प्रतिपादितमस्ति। यथा-

क्रियाया: परिनिष्पत्ति: यद्व्यापारादनन्तरम्।
विवक्षते यदा तत्र करणं तत्तदा स्मृतम्।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत:।। [8] इति।।

अत्र क्रियाया इत्यस्य फलात्मिकाया इति नागेशेनार्थो विहितो वर्तते। क्रियते या सा इति व्युत्पत्त्या फलात्मिकाया: क्रियाया इत्यर्थलाभो भवति। साध्यत्वेन प्रतीयमानत्वाच्च धात्वर्थफलस्य क्रियात्वेन व्यवहारो भवति। रामेण बाणेन हतो बाली इत्यत्र कीदृश: शाब्दबोधो भवतीति नागेशेन प्रतिपादितं यथा – रामेण बाणेन हतो बाली इत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वात् रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो बाणनिष्ठो व्यापार: तज्जन्यं यत्प्राणवियोगरूपं फलं तदाश्रयो बाली इति बोधो भवतीति। एवमेव रामो बाणेन बालिनं हन्ति इत्यत्र कर्तृप्रत्यये बाणव्यापारजन्यो यो बालिनिष्ठप्राणवियोगस्तदनुकूलो रामकर्तृको व्यापार इति बोधो भवति।
अत्र नागेशाशय:- शाब्दे तु कर्तृनिष्ठव्यापारस्य प्रयोज्यत्वसम्बन्धेन प्राणवियोगरूपे फल एवान्वयो भवति। समानशब्दोपात्तत्वप्रत्यासत्त्या फलव्यापारयोस्तथाऽन्वयस्यैव क्लृप्तत्वात्। रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो बाणाभिन्नकरणवृत्तिव्यापारजन्यश्च य: प्राणवियोग: तदाश्रयो बाली इति बोधस्यैव शाब्दत्वमिति ध्येयाद्। एतत्सर्वं ख्यापयन् नागेशो वक्ति यथा-

"अर्थाद्रामप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोध इति।"[9]

नागेशस्यैतत्कथनेन तुल्यन्यायाद् अनुपदोक्तकर्मकृदन्तस्थलेष्वपि रामव्यापारप्रयोज्यत्वस्य बाणव्यापारे पार्ष्णिकत्वमेव युक्तं भवतीति ध्वनितं भवति। सूत्रे प्रकर्षवाचकतमब्ग्रहणेन लक्षणे "स्वनिष्ठव्यापाराव्यवधानेनेति" पदस्य लाभो भवति। ततश्च कर्त्रादिपञ्चकारकाणां करणत्वस्य वारणं भवति। तत्र सर्वेषां कारकाणां फलनिष्पादकत्वं तुल्यमेवास्तीति हेतो:। तथा हि साधकतममिति सूत्रे तमबर्थ: प्रकर्ष:, स च अव्यवधानेन फलजनकव्यापारत्ता।
अत्रैषा शंका जागर्ति यत्- करणे या अतिशयेनोपकारकत्वविवक्षा सा कारकान्तरापेक्षया करणान्तरापेक्षया वा? यदि काराकान्तरापेक्षया विवक्षा, तदैकाधिककरणकारकाणि स्यु:, यदि तु करणान्तरापेक्षया विवक्षा तदा युगपदेकस्यैव करणत्वं स्यादिति। अस्यां शंकायामेवं वक्तुं शक्यते यत् प्रकर्षश्चात्र कारकान्तरापेक्ष एव, न तु करणान्तरापेक्षोऽपि, कारकसामान्यवाचिसाधकशब्दादुत्पन्नेन तमपा करणेतरकारकावधिकप्रकर्षस्यैव द्योतनात्। तस्मात् देवदत्तो रथेन दीपिकया राजमार्गेण व्रजतीति युगपदनेकरणसमावेश: सिद्धो भवति। अन्यथा करणान्तरापेक्षस्यापि प्रकर्षस्य ग्रहणे तु युगपदेकस्यैव कस्यचित् करणं स्यात्, एकस्यैव कस्यचित्प्रकृष्टत्वादिति बोध्यम्। अत्र सर्वेषां कारकाणां फलनिष्पादकत्वस्य युक्तत्वात् तेषां करणत्वं न स्यादिति करणत्वावारणाय प्रकर्षतमत्वस्य आवश्यकता भवति।

करणविषये अग्निपुराणेऽपि प्रतिपादितमस्ति। यथा करणं द्विविधम्- १. बाह्यम् २. आभ्यतरञ्च।
'चक्षुषा रूपं गृह्णाति बाह्यं दात्रेण तल्लुनेत्' [10] तत्र दात्रं छेदनक्रियायां बाह्यकरणं भवति। चक्षुस्तु रूपग्राह्ये रूपे कार्ये आभ्यन्तरकरणञ्च भवति। अपि च अग्निपुराणे तृतीयाविभक्ते: कतिपयान्युदाहरणानि दृश्यन्ते। यथा-
1. 'अनेन वसेत्' अत्र हेतौ इति सूत्रेण निवासस्य हेतौ तृतीयाविभक्तिर्भवति।
2. पृथक् विहारेण, विना श्रिया अत्र 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति पाणिनिसूत्रेण पृथगादियोगे तृतीया भवति।
3. "पिता पुत्रेण सहागत:" अत्र "सहयुक्तेऽप्रधाने" इति सूत्रेण सहशब्दस्य योगे तृतीया भवति।
4. 'अक्ष्णा काण:' 'गदया हरि:' अत्र "इत्थंभूतलक्षणे" इति सूत्रेण तृतीया भवति।

इत्थं कर्तृकरणयोस्तृतीया इत्यादिसूत्रसमुहै: विधीयमानाया: तृतीयाविभक्ते: कर्तृतृतीयादिशा आश्रयोऽर्थ:। करणतृतीयादृष्ट्या च आश्रयो व्यापारश्चार्थ इति फलति। करणञ्चेदं विवक्षाधीनमेव, न तु गोत्वादिवद् वस्तुविशेषे व्यवस्थितम्। अत एव स्थाल्यां पचतीत्यत्र अधिकरणत्वेन निश्चिता अपि स्थाली, झटिति तप्तत्वेन स्वव्यापाराव्यवहितोत्तरपाकनिष्पादकतया विवक्ष्यते चेत्तदा तस्या अपि करणत्वमिष्टमेव, तदा स्थाल्या पच्यते इति प्रयोग: साधुरेव। विवक्षात: कारकाणि भवन्ति इति नियमानुसारेण अधिकरणादीनामपि करणत्वविवक्षया सर्वत्र तृतीयाप्राप्तिसत्वात् द्वितीयासप्तम्यो: निरवकाशता भवतीति विवक्षात एव तृतीयाविभक्तिर्भवतीति कथमुच्यते इति शंकाया: निराकरणमत्रमित्थं क्रियते यथा यत्रान्येषामेव करणत्वविवक्षा न तु स्थाल्या: तत्र स्थालीशब्दात् तृतीयाविभक्ति: भवत्येव यथा देवदत्त: काष्ठेन स्थाल्यां पचति। एवमेव यत्र कारकान्तरविवक्षा तत्र विवक्षाभावात् सर्वत्र तृतीयापत्तिरपि नापादनीया। अत एवोक्तं कौण्डभट्टेन यथा "विवक्ष्यते इत्यनेन सकृदनेकेषां तदभावात्, द्वितीयासप्तम्यादे: अवकाशं सूचयति" इति। [11] एवंरूपेण सर्वैरेव वैयाकरणै: प्रतिपादितानां करणस्वरूपाणां मतैक्यं दृश्यते। करणस्वरूपपर्यालोचनेन वक्तुमिदं शक्यते यच्छाब्दबोधे कर्तृव्यापारातिरिक्त: करणव्यापार: प्रतीयत एव। तत्र कर्तृवृत्तिव्यापारस्तु धातुवाच्य: किन्तु करणव्यापारस्य पदार्थत्वप्रतिपादनाय तत्र तृतीयाया: शक्तिरावश्यकी। तस्मादाश्रयव्यापारौ द्वावेव कर्तृतृतीयावाच्यौ इति वैयाकरणानां सम्मति:। कर्तृसंज्ञाविधायकं सूत्रन्तु पूर्वमेव प्रतिपादितम्। अत्र करणसंज्ञाविधायकानि सूत्राणि यथा-

"साधकतमं करणम्" [12]
"दिव: कर्म च" [13] विभाषया करणसंज्ञाविधायकं सूत्रमिदम्।

इत्थमेते पाणिनिना प्रणितायामष्टाध्याय्यां पठिते सूत्रे करणसंज्ञाविधायके स्त:। एताभ्यां सूत्राभ्यां करणसंज्ञाविहितस्थले करणत्वेन तृतीयाविभक्तिर्विधीयते। एत सूत्रेऽतिरिच्य वार्तिकान्यपि सन्ति करणसंज्ञाविधायकानि। तानि तत्रैव वैयाकरणग्रन्थेषु द्रष्टव्यानि। विस्तरभिया नैवाऽत्र प्रस्तूयन्ते। तृतीयाविधायकानि सूत्राणि यथा- "कर्तृकरणयोस्तृतीया२/३/१८" "अपवर्गे तृतीया २/३/६"

“सहयुक्तेऽप्रधाने २/३/१९” “येनाऽङ्गविकारः २/३/२०” “इत्थंभूतलक्षणे २/३/२१” “संज्ञोऽन्यतरस्यां कर्मणि २/३/२२” “हेतौ २/३/२३” “पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् २/३/३२” “सर्वनाम्नस्तृतीया च २/३/२७” “तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् २/३/७२” “प्रसितोत्सुकाभ्यां तृतीया च २/३/४४” इत्थमेतानि पाणिनिना प्रणितायामष्टाध्याय्यां पठितानि तृतीयाविधायकानि सूत्राणि सन्ति। एतैः सूत्रैः करणसंज्ञाविहितस्थले विविधानां पदानां योगे च तृतीयाविभक्तिर्विधीयते। एतानि सूत्राण्यतिरिच्यान्यान्यपि सूत्राणि, वार्त्तिकानि च सन्ति विभाषया तृतीयाविधायकानि। तान्यष्टाध्याय्यां वैयाकरणसिद्धान्तकौमुद्यां द्रष्टव्यानि विस्तारभिया नात्र प्रस्तूयन्ते। इति करणत्वस्य तृतीयाविभक्तेश्च विचारः।

पादटिप्पणी

1. पा.सू. १/४/४६
2. वैयाकरणभूषणसार, सुबर्थनिर्णयः पृ.सं.१६९
3. वैयाकरणभूषणसार,धात्वर्थप्रकरणम् का.सं.१
4. प.ल.म.का.नि. १७२
5. पा.सू.१/४/४२
6. वाक्यपदीयम् पदकाण्डम् साधनसमुद्देशः ९०
7. पा.सू.२/३/३३
8. वाक्यपदीयं पदकाण्डम् साधनसमुद्देश का. सं. ९०-९१
9. परमलघुमञ्जूषा कारकार्थनिरूपणम् पृ.सं.१७३
10. अग्निपुराणम् ३५४/८.१
11. वैयाकरणभूषणसार, सुबर्थनिर्णयः पृ.सं.१९८
12. पा.सू.१/४/४२
13. पा.सू.१/४/४५